# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - शास्त्रिद्वितीयवर्षम्, सत्र-३ | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
|---|---|---|
| विषयः - रामानुजवेदान्तः | (C.E.2.3.5 - OLD) | |
| दिनाङ्कः - ११/१२/२०१८ | श्रीमद्भगवद्गीता रामानुजभाष्यसहिता | समयः - ०२:०० तः ०५.०० |

### प्रथमान्वितिः

**प्रश्नः १ अधस्तनश्लोकेषु द्वयोः श्लोकयोः व्याख्यानं विधेयम् ।** **( १० )**

(१) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

(२) कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥

(३) उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥

**प्रश्नः २ अधस्तनप्रश्नयोः कस्यचिदेकस्य सविस्तरम् उत्तरं यथासिद्धान्तं लिखत ।** **( १० )**

(१) प्रथमाध्याये वर्णितमर्जुनस्या विषादं सविशदं प्रतिपादयत ।

(२) प्रथमाध्यायस्य सारांशं सविस्तरं लिखत ।

### द्वितीयान्वितिः

**प्रश्नः ३ अधस्तनश्लोकेषु श्लोकद्वयं यथाभाष्यं व्याख्येयम् ।** **( १० )**

(१) अशोच्यानन्वशोचस्त्वं प्रज्ञावादाँश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥

(२) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

(३) अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥

**प्रश्नः ४ अधस्तनप्रश्नयोः कस्यचित् प्रश्नस्यैकस्य सविस्तरम् उत्तरं लिखत ।** **( १० )**

(१) आत्मनः स्वरूपं प्रतिपाद्य तन्नित्यत्वं संसाधयत ।

(२) ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'' श्लोकोऽयं यथाभाष्यं सविशदञ्च व्याख्येय : ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोनिर्दिष्टेषु श्लोकेषु द्वयोः व्याख्यानं ससन्दर्भं सभाष्यञ्च कुरुत ।** **( १० )**

(१) ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥

(२) प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥

(३) इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिः यो बुद्धेः परतस्तु सः ॥

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्य सविस्तरमुत्तरं यथाग्रन्थं लिखत ।** **( १० )**

(१) कर्मयोगस्य स्वरूपं माहात्म्यञ्च यथाग्रन्थं वर्णयत ।

(२) तृतीयाध्यायस्य सारांशं सविशदं लिखत ।

**प्रश्नः ७ अधस्तप्रश्नेषु दशप्रश्नानामतिलघूत्तराणि यथाग्रन्थं लिखत ।** **( १० )**

(१) सोमदत्तस्य पुत्रः कः आसीत् ?

(२) पाञ्चजन्यं शंखं कः प्रदध्मौ ?

(३) राज्ञः युधिष्ठिरस्य शंखस्य नामधेयं किमासीत् ?

(४) संख्ये शोकसंविग्नमानसोऽर्जुनः किं विसृज्य उपाविशत् ?

(५) प्रथमाध्याये कति श्लोकाः सन्तिः ?

(६) कस्य इमे देहा अन्तवन्तः प्रोक्ताः ?

(७) हन्यमाने शरीरे को न हन्यते ?

(८) पावकः कं न दहति ?

(९) आत्मा नित्यो वाऽनित्यो वा ?

(१०) सांख्ययोगः कस्मिन्नध्याये प्रतिपादितः ।

(११) लोकेऽस्मिन् द्विविधा निष्ठा का ?

(१२) मिथ्याचारः कः उच्यते ?

(१३) स्वधर्मे किं श्रेयः ?

(१४) वह्निः केनाव्रियते ?

(१५) 'अन्नाद् भवन्ति भूतानि' इत्यत्रवाक्ये भूतशब्देन किं निर्दिष्टम् ?

--००--